षत् प्रवर्त्तते। कुम्भीकः स च विज्ञेय ईर्ष्यकं शृणु चापरम्। दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते। ईर्ष्यकः स च विज्ञेयः षण्डकं शृणु पञ्चमम्। यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते। ततः स्त्रीचेष्टिताकारो जायते षण्डसंज्ञितः। ऋतौ पुरुषवद्वापि प्रवर्त्तेताङ्गना यदि। तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता। आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा। सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः। अनया विप्रकृत्या तु तेषां शुक्रवहाः सिराः। हर्षात् स्फुटत्वमायान्ति ध्वजोच्छ्रायस्ततो भवेत्"।

तस्य दायानधिकारिता अनंशशब्दे १४२पृ०उक्ता। तत्रायं विशेषः। "क्लीवोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः। अन्धोऽचिकित्स्यरोगाद्या भर्त्तव्याः स्युर्निरंशकाः" या० व्याख्या मिता० "एतेषां विभागात् प्रागेव दोषप्राप्तावनंशत्वं न पुनर्विभक्तानां, विभागोत्तरकालमप्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव "विभक्तेषु सुतो जातः सवर्णायां विभागभाक्" इत्यस्य समानन्यायात्। क्लीवान्धौ यदि जन्मत आरभ्य तदा विभागानर्हावेव यदि त्वन्तरा तदा, तदपगमश्चेदौषधादिना, तर्हि "दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितादिति" रीत्या विभागार्हावेवेत्युक्तम्"। अत्र विशेषः क्लीवादीनामनंशत्वात्तत्पुत्राणामप्यनंशत्वे प्राप्त इदमाह" मिता० "औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः"। या० "एतेषां क्लीवादीनामौरसाः क्षेत्रजा वा पुत्रा निर्दोषा अंशग्रहणविरोधिक्लैव्यादिदोषरहिता भागहारिणः, अंशग्राहिणो भवन्ति। तत्र क्लीवस्य क्षेत्रजः पुत्रः सम्भवत्यन्येषामौरसा अपि। औरसक्षेत्रजयोर्ग्रहणं दत्तकपुत्रव्युदासार्थम्। क्लीवादिदुहितॄणां विशेषमाह मिता०"। "सुताश्चैषां प्रभर्त्तव्या यावद्वै भर्त्तृसात्कृताः"। या० "एतेषां क्लीवादीनां सुता दुहितरो यावद्विवाहसंस्कृता न भवन्ति तावद्भरणीयाः। चशब्दात् संस्कार्य्याश्च। क्लीवादिपत्नीनां विशेषमाह मिता०" "अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च" या०। "एषां क्लीवादीनामपुत्राः पत्न्यः साधुवृत्तयः सदाचाराश्चेद्भर्त्तव्या भरणीयाः। व्यभिचारिण्यस्तु निर्वास्याः। प्रतिकूलास्तथैव च निर्वास्या भवन्ति भरणीयाश्चाव्यभिचारिण्यश्चेत्। न पुनः प्रातिकूल्यमात्रेण भरणमपि न कर्त्तव्यम्" मिता०

वीरमित्रोदये विशेषः "क्लीवादीनामपि दारपरिग्रहेण पुत्रसम्भव उक्तो मनुना "यद्यर्थिता तु दारैः स्यात् क्लीवादीनां कथञ्चन। तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति"। तन्तुरपत्यम्। नच क्लीवादेरुपनयनाभावेन पतितत्वात् कथं दारसम्बन्ध इति वाच्यम्। उपनयनानर्हतया अनुपनीतत्वे शूद्रवदपतितत्वात्"।

एतच्चिन्त्यं "मुखेभगाश्च ये केचित् क्लीवप्राया नपुंसकाः। ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः" शु० त० ब्रह्मपु० क्लीवस्य पतितत्वोक्तेः। केचित्तु तत्र उत्तरार्द्धे "पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः पातः कर्त्तव्यो नचाश्रुनाशौचमुदकक्रिया" इत्युक्तेरशौचाद्यभावाङ्गमिदं पातित्यं नान्यत्र। अतएव अनंशिगणनायां याज्ञवल्क्यादिभिः पतितात् पृथक् क्लीवस्य कीर्त्तनं सङ्गच्छते इत्याहुः। मनुनाऽस्यापाङ्क्तेयत्वमुक्तम् "आचारहीनः क्लीवश्च नित्ययाचनकस्तथा" इत्युपक्रमे "एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान्" इति। "अस्योत्पत्तौ कारणमुक्तं मनुना। "पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः। साम्येऽपुमान् पुंस्त्रियौ वा क्षीणाल्पे च विपर्य्ययः" "पुंसो बीजेऽधिकेऽयुग्मास्वपि पुत्रो जायते स्त्रीबीजेऽधिके युग्मास्वपि दुहितैव। अतो वृष्याहारादिना निजबीजाधिक्यं भार्य्यायाश्चाहारलाघवादिना बीजाल्पत्वमवगम्यायुग्मास्वपि पुत्रार्थिना गन्तव्यमिति दर्शितं स्त्रीपुंसयोस्तु बीजसाम्येऽपुमान् नपुंसकं जायते पुंस्त्रियाविति यमौ निःसारेऽल्पे चोभयोरेव बीजे गर्भस्यासम्भवः" कुल्लू०।

कर्त्तव्यकर्म्मसु २ निरुद्यमाहे ३ अधीरे ४ विक्रमहीने अमरः तस्य भावः ष्यञ्। क्लैव्य न०। तल् क्लीवता स्त्री। त्व क्लीवत्व न० तद्भावे "मा क्लैव्यं गच्छ कौन्तेय! नैतत्त्वय्युपपद्यते" गीता। "पुनरक्लीवतया प्रकाश्यताम्" रघुः। "अक्लीवतया धैर्य्येण" मल्लि०। "कोहि धर्म्मोऽस्ति ते भीष्म! ब्रह्मचर्य्यमिदं वृथा। यद्धारयसि मोहाद्वा क्लीवत्वाद्वा न संशयः" भा० स०४०अ०। क्लैव्यञ्च पुंस्त्वेन्द्रियोपघातः अशक्तिशब्दे ४७२ पृ० उदा०। जातस्य क्लीवताकारणं च सुश्रुते दर्शितं यथा "शुक्रवहे द्वे धमन्यौ तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च"। "क्लीवरूपांस्तिरीटिनः" अथ० ८,६,७, क्लीववदाचरति उत्रः क्विप् वा। क्लीवायते। क्ला-